श्रीः

श्रीमते निगमान्तमहादेशिकाय नमः

श्रीमान् वेङ्कटनाथार्यः कवितार्किककेसरी।
वेदान्ताचार्यवर्यो मे सन्निधत्तां सदा हृदि॥

श्रीमत् मैसूर् आण्डवन् श्री श्रीनिवासरामानुजमहादेशिकैः अनुगृहीता

# ॥ श्रीमहालक्ष्म्याः अष्टोत्तरशतनामगुणस्तुतिः ॥

*This document* has been prepared by*

***Sunder Kidambi***

*with the blessings of*

श्री रङ्गरामानुज महादेशिकन्

**His Holiness *śrīmad āṇḍavan* of *śrīraṅgam***

*This was typeset using LaTeX and the **skt** font.

श्रीः

श्रीमते रामानुजाय नमः

श्रीमते निगमान्तमहादेशिकाय नमः

# ॥ श्रीमहालक्ष्म्याः अष्टोत्तरशतनामगुणस्तुतिः ॥

श्रीमान् वेङ्कटनाथार्यः कवितार्किककेसरी।
वेदान्ताचार्यवर्यो मे सन्निधत्तां सदा हृदि॥

देवश्रीः प्रियदर्शिनी हितकरी सर्वेष्टदा माधवी
वेदश्रीः श्रुतिमार्गिणी सुविमला सर्वोत्तरा शाश्वती।
ब्रह्मश्रीः द्रुहिणप्रसूः सुचरिता सर्वाकृतिः भार्गवी
पुण्यश्रीः हृदयङ्गमा शुभकरी विश्वम्भरा पातु नः॥ १ ॥

सर्वेष्टा कलिनाशिनी सुतरुणी भोगप्रिया कामिनी
विश्वश्रीः परभक्तिदा कलरवा प्रोत्तारिणी शान्तिदा।
सत्कीर्तिः समदर्शिनी दृढमतिः रत्नावळी रुक्मिणी
पद्माक्षी विजयप्रदा सुरसिका नारायणी पातु नः॥ २ ॥

सर्वज्ञा गरुडासना भगवती यज्ञाशिनी पाविनी
गायत्री गुणभूषणा सुगहना मेधाविनी भोगिनी।
दिव्याङ्गा सुफलप्रदा सुमधुरा पद्मासिनी हारिणी
राजश्रीः शुभदेवता सुवदना चारुस्मिता पातु नः॥ ३ ॥

योगक्षेमवहा त्रिलोकजननी ब्रह्मस्तुता सुस्थिरा
कूटस्था कुललक्षणा प्रथमजा माता वरिष्ठाऽनघा।
सर्वज्ञा कुलनन्दिनी द्युतिमती धीरा मनीषाकृतिः
भद्राङ्गी सुगुणोत्तरा विजयदा शोभानना पातु नः॥ ४ ॥

सौम्या वेदमयी क्षमा गुणमयी दारिद्र्यविध्वंसिनी
सुप्रीता वरदा रमा सुनयना विष्णुप्रिया पद्मिनी।
धर्मोद्धारकृतादरा सुहृदया दीनाश्रया मोदिनी
गम्भीरा कमलेक्षणा श्रुतिहिता धर्मोदया पातु नः॥ ५ ॥

www.prapatti.com

पूर्णानन्दमयी यशस्सुखकरी तापत्रयोन्मूलिनी
पद्मा योगकरी मुकुन्ददयिता विश्वप्रिया क्षेमदा।
सर्वारिष्टनिवारिणी सुफलदा सर्वेश्वरी सर्वदा
श्रीरित्यन्वहं आदरात् पठति योऽपायात् स संरक्ष्यते॥ ६॥

लक्ष्मीषट्कमिदं ददाति पठतां सद्यः फलं स्वेप्सितं
आम्नायान्त पुराण सूक्तविहिता नामावळिः श्रेयसी।
सैषेति स्तवरूपतो व्यरचयत् गोपालसूरिर्मुदा
नाम्नां अष्टपरां शतीं समुचितां षट्श्लोकतोऽपूरयत्॥ ७॥

॥ इति श्रीमहालक्ष्म्याः अष्टोत्तरशतनामगुणस्तुतिः समाप्ता॥

कवितार्किकसिंहाय कल्याणगुणशालिने।
श्रीमते वेङ्कटेशाय वेदान्तगुरवे नमः॥

www.prapatti.com